भवति किं वद खस्य वर्गं मूलं घनं घनपदं खगुणाश्च पंच खेनोद्धृता दश च कः ख
गुणो निजार्द्धयुक्तस्त्रिभिश्च गुणितः खहृतस्त्रिषष्टी १६ न्यासः ० एतत् पंचयुतं जातं
५ खस्य वर्गं ० खस्य मूलं ० खस्य घनः ० अस्य मूलं ० न्यासः ५ ते खेन गुणिताः ० खे

भिन्न

नमस्ताः स्वजाता हरगणयोस्तुल्यत्वात्तद्वत् ५ अस्मिन्विकारः खहरः न राशावपि
प्रविष्टेष्वपि निःसृतेषु बहुष्वपि स्याल्लयसृष्टिकालेऽनन्तेऽच्युते भूतगणे
षु यद्वत् १७ न्यासः ५ एते खेन भक्ता जाताः ५/० अथ प्रथमतोऽनन्तराशिः खहार इत्यु
च्यते गुणः सार्द्धक्षेपः ३ गुणः ३ हरः ० दृश्यम् ६३ अतो वक्ष्यमाणेन विलोम
विधिना इष्टकर्मणा वा लब्धो राशिः १४ अथ शून्यगणितस्य ग्रहगणिते महानुप
योगः इति शून्यपरिकर्माष्टकं॥ अथ व्यस्तविधौ करणसूत्रं वृत्तं छेदं
गुणं गुणं छेदं वर्गं मूलं पदं कृतिं ऋणं स्वं स्वमृणं कुर्याद्दृश्ये राशिप्रसिद्धये
१८ अथ स्वांशाधिकोने तु लवाढ्योनो हरो हरः अंशस्त्वविकृतस्तत्र विलोमे
शेषमुक्तवत् १९ अत्रोदाहरणं यस्त्रिघ्नस्त्रिभिरन्वितः स्वचरणैर्भक्तस्ततः सप्त
भिः स्वत्र्यंशेन विवर्जितः स्वगुणितो हीनो द्विपंचाशता तन्मूलेऽष्टयुते हृते च दश

अथ तादृशज्ञानप्राप्त्युपक्रमेण बहिरंगांतरंगसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिताः याः क्रियाः नित्य-
नैमित्तिकप्रत्यवायनाशादिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तांतःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तद-
नुष्ठानपूर्वकमेवोपात्तानि साधनानि शमदमादीनि येन तादृशः अनेन कर्मणां बहिरंगत्वं शमदमादीनामंत-
रंगत्वं स्फुटमेवोक्तं किंच शमदमवैराग्यादिचित्तस्थैर्यपर्यंतं कर्मानुष्ठानमेवेति सूचितं ततस्तत्कर्मानुष्ठानं
समाप्य तत्त्यागात्संन्यस्येति यावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्त्वमस्यादिवाक्यार्थविचाराय सद्गुरुं संश्रो

आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः समाप्य तत्पूर्वमुपात्तसाधनः समाश्रये-
त्सद्गुरुमात्मलब्धये ॥७॥ क्रिया शरीरोद्भवहेतुरादृता प्रियाप्रियौ तौ भवतः सुरागिणः धर्मेतरौ तत्र पुनः
शरीरकं पुनः क्रिया चक्रवदीर्यते भवः ॥८॥

विविदिषंतीत्यादिलक्षणलातीतं समाश्रयेत् सेवेत अनेन व्युत्पत्तिबलेन स्वयमेव वाक्यार्थविचारः क्रियमाणो न
फलायेति सूचितम् ॥७॥ संसारस्याविद्यकरूपत्वात्तन्निवृत्तेस्तत्कारणज्ञाननिवृत्तिमूलकत्वात् अज्ञाननि-
वृत्तेश्च तत्त्वज्ञानैकसाध्यत्वात् तत्त्वज्ञानस्य च वेदांतविचारसाध्यत्वात् तदर्थं गुरुं समाश्रयणमित्याह क्रियेति भ-
वः संसारश्चक्रवादिपरिवर्तमानः ईर्यते कथ्यते न देवोपपादयति आद्यता आदरपूर्वं पूर्वजन्मार्जिता क्रिया एतस्य
शरीरोद्भवस्य जन्मनो हेतुः तत्र जन्मनि सुरागिणो विषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियो

~~पत्र - 4~~

पत्र - 2

आ० - 24 X 11

सप्तमीएवंसंप्रदायेपि अन्यथा मद्गुरावर्यांश्याकारे बोध्यः तथाचप्रकारतानिरूपिता
धिकरणत्वसप्तमीविधिवत्सूत्रनद्भावविधिकर्मयोग्यताकर्तृकाहरिकर्म।
वे० कंदेवदत्तव्यापारजन्यंफलजनकमितिबोध्यः आनन्दमयइत्यत्रप्रचुरार्थः अथवा न
५३ प्रचुरानन्दत्वमितिबोध्यः तत्प्रकृतवचनेमयट्प्रत्ययभावेधिकरणेकाम्यय
ट् तत्रानन्दमयपदस्योक्तब्रह्मात्मनोतिनिर्धर्मकत्वादानन्दरूपत्वेनतदधि
करणत्वाभावाच्चकथंमयडितिचेन्न निर्धर्मकस्यापिव्यावहारिकप्राचुर्यस
द्धर्मकत्वात् तर्हिंप्रियत्वसम्बन्धस्यावैकल्पिकत्वेपि आधाराधेयभावोबोध्यः ५३
अतएवविकारप्राचुर्येनिवेत्यात्तुर्यादिनिप्रासमहत्त्वम् अथवातदितियोग

भवेत्तु सामानाधिकरण्येन संबन्धेन शास्त्रीयविशिष्टे लौकिके न तु केवल लौ
किके नापि केवलशास्त्रीये इत्यूचुर्वैयाकरणनव्याः तन्न मस्तिके तस्य लौकि
कसंभवेन पुंमस्तिके समवराग्रस्थात् ननु पशुनायजेतेत्यादौ शास्त्रीयपुंस्त्वसा
धयसाधारण्येन पुंस्त्वस्याविवक्षितत्वात् नह्रियायायागइतिमीमांसकोद्घोषः
कथंसङ्गच्छते इति चेत् छागो वा मंत्रवर्णादितिषाष्ठाधिकरणेन तन्निर्णया
त् शास्त्रीयमपि लिङ्गं लौकिकलिंगवद्दृष्टाद् बाधे भासते न चैवानुभवात् को
श्वादिग्रामारण्याद्भाष्येतु सलादीनामुपचयापचयइतिस्त्वं पुंस्त्वस्त्रीत्वन
पुंसकत्वमुक्तम् अथ तद्धितार्थो निरूप्यते तत्राग्नेयमित्यादौ देवताविशिष्टं

श्रीः

५२

देयन्नासयागर्थः पूषन्नानन्नग्रहः सर्वत्रासभेदेनान्वयः तथाचान्यभिन्नदेवतासं
बंधीति बोधः अथवाग्निस्तिदेवताकत्वविशिष्टकर्मदेयमिति बोधः सदैवदेवता
त्वस्यानिरूपकतासंबंधेनान्वयः नन्वेवमह्निनेनचतुर्थ्यातासंप्रवर्णेऽपिन
देवतासङ्गतिलक्षणं देवल्लन्त्रपरसमर्थमिति मीमांसकोक्तन्यायेन लक्षणमिति चे
त् इष्मन्तद्धितेषु मात्वर्णागमर्थदेवतासंबंधः तथाचस्कृतिलिंगेनादीनां
बलाबलत्वम् तद्धितपदकार्थीभावस्यैकारात्वान्नित्वम् ब्राह्मणवद्धीनम्मा
दौ ब्राह्मणप्रतियोगिकसादृश्यस्याध्ययनक्रियायामसंभवात्तत्कर्तृकाध्ययने
लक्षणा तथाच ब्राह्मणकर्तृकाध्ययनप्रतियोगिकसादृश्यवदध्ययनमिति बो

न

3

५२

धःऐन्द्रियगाद्यग्रीष्मादौ नवनिष्पत्ययः। अत्रानिपदिकत्वात् किंचसादृश्यपवि
घ्रेष्यकत्वं हि प्रतिनाम्नत्रेयापत्तिस्थितेहे न तन्नाशनत्वसादृश्यपथिवार्थः किन्तुसंभाव

७९व

नानिकोत्स्वहेव नडुभंमन्तेह्यवभाग्नेव वैतिडऽन्ये नोद्यमानमतिस्मरविन्दव
त्स्वरंसनिमत्र [illegible] भवतिक्रियाध्याहारः नद्यावत्[illegible]स्तुदरतावित्भवनसद्द
पं हस्तदरमुद्भवनमिति बोधः। प्राप्नोतेन तुल्सामभ्यो रिस्यत्रनवतिर्भवतिउ
घेमयस्क्रियात्वेन स्य ग्रहणेः तत्रनस्येतिवतिः नद्भुणादित्वेपिमधुरावत्ता
दलिवुत्रकेषाकारः मधुराघतियोगिकसादृश्यवत्तादलिवुत्रकाधिकरणकः
प्राकारइतिबोधः अत्रमथुरा[illegible]पदं लाक्षणिकं तस्मादेवतापकात्मथमार्थेस

कुल आकार - 34 x 12 $\frac{1}{2}$

पत्र - 17

अथ प्रसंगात्सुवर्णस्य तैजसत्वं विचार्यते अत्र मीमांसकाः सुवर्णं पार्थिवं नैमित्तिकद्रवत्वात् घृतवदि
ति अनुमानेन सुवर्णं पार्थिवं नच सुवर्णस्य पृथिवीत्वे तदीयद्रवत्वस्याग्निसंयोगेन नाशापत्तिः घृतादिद्र
वत्ववदिति वाच्यम् सुवर्णद्रवत्वव्यावृत्तविजातीयद्रवत्वनाशत्वस्यैवाग्निसंयोगजन्यतावच्छेदक
त्वात् नच वैजात्ये मानाभाव इति वाच्यम् आतपनाशजन्यद्रवत्वनाशे व्यभिचारवारणायातप(
नाशाजन्यत्वनिवेशे गौरवेण लाघवादातपनाशानाश्यद्रवत्वव्यावृत्तवैजात्यनिवेशस्यावश्य
कतया सुवर्णद्रवत्वव्यावृत्तस्यैव सिद्धेः नचात्र पीतरूपवद्विशेषवद्द्रव्यात्मकसुवर्णस्य पक्षत्वे उप
ष्टंभकपृथिव्यंशमादाय सिद्धसाधनम् तैजससुवर्णस्य पक्षत्वे, प्रसिद्धिरिति वाच्यम् सुवर्णपद
वाच्यत्वस्यात्यंतानलसंयोगेप्यनुच्छिद्यमानद्रवत्वस्यैवापक्षतावच्छेदकत्वात् नच धर्मिग्राहकादौ(
पीतद्रव्यविशेषस्यापि सुवर्णपदवाच्यतया सिद्धसाधनमिति वाच्यम् अवच्छेदकावच्छेदेन साध्यसि
द्धावंशतः सिद्धसाधनस्यादोषत्वात् इत्याहुः अत्र नैयायिकाः उक्तानुमानस्याप्रयोजकतया सु
वर्णे पृथिवीत्वसिद्धिर्न संभवतीति तत्र तैजसत्वमेवोपेयते तत्र मानं च सुवर्णं तैजसम् अत्यंतान
लसंयोगे सत्यनुच्छिद्यमानद्रवत्वात् यन्नैवं तन्नैवं यथा घृतादिकमिति केवलव्यतिरेक्यनुमानमा
नमेव नचाप्रयोजकत्वम् अग्नेरपत्यं प्रथमं हिरण्यमिति श्रुतेरेवानुकूलतर्कत्वात् नचो

कृहितोऽसाधारण्येनत्वपादुष्टत्वमितिवाच्यम् असाधारण्यस्यसत्प्रतिपक्षोत्थापकतयादूषकत्वेनतस्य
चतुल्यबलत्वएवसंभवेनसाध्याभावसाधनेऽनुकूलतर्कविरहेणसाध्यसाधनेचोक्ततर्कसत्त्वेन
तुल्यबलत्वाभावेनतस्यादोषत्वात् नचसुवर्णस्यतैजसत्वेतत्रपीतरूपगुरुत्वयोरनुपपत्तिरि
तिवाच्यम् तयोरुपष्टंभकभागगतत्वात् नचहेतुस्वरूपासत्त्वंदुर्वारमितिवाच्यम् प्रहरणात्मका
दिस्थलकालीनतस्यैवपक्षतैजसत्वात् युज्यतेचैतत् अन्यथात्यंतानलसंयोगेनपीतरूपवति
घृतद्रवत्वनाशापत्तेः मन्मतेतुजलसंबंधघृतावतिसंयोगेपिद्रवत्वादिनाशानुत्पत्त्यानैमित्तिक
द्रवत्वादिनाशंप्रतिपार्थिवान्यद्रवद्रव्यसंयोगस्यप्रतिबंधकतयातैजसद्रुतसुवर्णात्मकद्रव
संबंधस्यसत्वान्नोक्तापत्तिःसंभवतीति नचसुवर्णस्यतैजसत्वेघटपाकदृष्टांतेनकथंतत्ररक्त
रूपोपलब्धिरितिवाच्यम् जलोपधगतरक्तरूपोपलब्ध्युपगमात् नचसुवर्णस्यतैजसत्वे
तत्रतच्छुक्लभास्वररूपप्रत्यक्षापत्तिरितिवाच्यम् उपष्टंभकपृथिवीभागगतपीतरूपेणतस्या
भिभवात् नचैवमप्यंधकारेतद्ग्रहणापत्तिः बलवत्सजातीयग्रहणप्रयुक्ताग्रहणस्यैवाभिभ
वतया तदानींपीतरूपाग्रहणेनतस्याभिभावकत्वासंभवादितिवाच्यम् लाघवेनैतत्रसजा ताम
तीयसंबंधस्यैवतत्त्वेनांधकारेपित्वाश्रयपार्थिवसंयोगिसमवेतत्त्वात्मकसंबंधस्यसत्वा

दिति अत्र मीमांसकनव्याः उक्तानुमानान्न सुवर्णे तैजसत्वसिद्धिरिति [illegible] अत्यंतानलसंयोगेना
दिहेत्वसिद्धेः न चैवं तत्रात्यंतानलसंयोगेन द्रवत्वोच्छेदापत्तिरिति वाच्यम् इष्टापत्तेः अत एव सुवर्णे द्रुते
द्रुततरं द्रुततमम् इति प्रतीतेरप्युपपत्तिः न चैवं तत्र द्रवत्वस्यात्यंतोच्छेदापत्तिरिति वाच्यम् सुवर्णेऽ
ग्निसंयोगात्पूर्वं द्रवत्वनाशकाले द्रवत्वान्तरोत्पादकसामग्र्यनियमतः स्वीकारात् वस्तुतस्तद्रूपप्र
तीतिप्रयुक्ता विजातीयद्रवत्वनाशं प्रत्येवाग्निसंयोगस्य हेतुत्वमातु सुवर्णद्रवत्वे तादृशवैजात्यानङ्गीकारे
तादृशकारणाभावान्न सुवर्णद्रवत्वनाशापत्तिः यत्तु तत्राग्निसंयोगात्पीतरूपनाशापत्तिवारणायाप
पीतरूपादिनाशप्रतिबंधकत्वेन कॢप्तस्य द्रवद्रव्यसंबंधस्य घटकतया द्रुतद्रव्यं किंचित्सिध्यति त
च्च पृथ्वीं न पृथिवीपार्थिवद्रव्यसंबंधस्य रूपनाशप्रतिबंधकत्वात् नापि जलं निमित्तहत्वात् अतस्त
दुभयभिन्नत्वेन तेजस्त्वं सिध्यतीति तन्न सुवर्णे दृढाग्निसंयोगे रूपनाशकतावच्छेदकवैजात्या
नुपगमेन विजातीयाग्निसंयोगाभावे नैव तत्र पीतरूपनाशापत्तिवारणसंभवेन द्रवद्रव्यसंबंधस्य
प्रतिबंधकत्वमाननाभावात् तस्मात्सुवर्णं पार्थिवं लोमितिक द्रवत्वात् घृतवदित्यनुमानेन सुवर्णस्य व्या
प्तिनिश्चित्ते जोंतराकल्पनप्रयुक्तलाघवतर्कसहकृतेन सुवर्णस्य पार्थिवत्वमेवेति प्रतीत्या द्रुतं दृष्टत
त्त्वव्याप्तेः पत्यंप्रपधमं हि दृढमिति अत्र सुवर्णस्य तेजस्त्वसिद्धेर्दुर्वारत्वात् नव्यत्वस्या अस्ते निर्मि

तत्कारणतामादायाप्युपपत्त्या न तेजस्त्वसाधकत्वमिति वाच्यम् तस्याप्युपादानप्रकरणस्थत्वेन तत्का-
र्यकुम्भशक्यत्वात् इति दिक् यत्तु मणिकारस्य वायुप्रत्यक्षतावादिनो मीमांसकं प्रति प्रत्युद्भूतस्पर्शवत्त्व-
स्य बहिर्द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति प्रयोजकत्वमुपेयं वा यो: प्रत्यक्षत्वं त्वयोपेयते तदा सुवर्णे रूपे तेजो-
द्रव्यमुद्भूतरूपमनुद्भूतस्पर्शप्रत्यक्षत्वं न स्यादिति दूषणमुक्तेन सुवर्णे तैजसत्वबाधस्यावतारणं तन्न सम्य-
क् उद्भूतरूपवत्सुवर्णेऽस्योद्भूतस्पर्शनित्वनियमात् यथा सुवर्णस्य चाक्षुषत्वानुपपत्तिः उद्भूतरूपेणा-
तेजस्त्वविशिष्टद्रव्यत्वानुपपत्तिः उद्भूतस्पर्शमाने नहि सुवर्णे तत्त्वविशिष्टद्रव्यप्रमितिः इति वक्तुं शक्यं नचैवं त्व-
चा त्वे सुवर्णत्वग्रहापत्तिर्जातेर्व्यक्तिग्राहकग्राह्यत्वादिति वाच्यम् सुवर्णत्वजातेः सुवर्णगतजातिविशेष-
व्यंग्यत्वात् अतएव निकषघर्षणाद्यपेक्षा अन्यथा सन्निकर्षग्रहणेऽपि त्वगिन्द्रियाद्ग्रहतया तत्रापि उद्भूतस्प-
र्शो न स्यात् तस्मात् स्पर्शग्रहे तु सुवर्णे तैजसत्वबाधाभिरुत्थे वमरणीयमम भाति एवं बहिर्द्रव्यप्रत्यक्षे म-
हत्त्वोद्भूतरूपयोरपि हेतुत्वं ते न प्रमाणवायुचक्षुरादीनां न प्रत्यक्षतापितिः नन्वालोकसंयोगानवच्छे-
दकावयवावच्छेदेन चक्षुः संयोगसत्त्वे चाक्षुषत्वावारणाय स्यावच्छेदकावच्छेदेन मत्वसंबन्धेनालोकसंयोगवि-
शिष्टचक्षुः संयोगत्वेन हेतुत्वं वाच्यम् तत्र विशेष्यविशेषणभावे विनिगमनाविरहेण कार्यकारण-
भावद्वयम् अवच्छेदकाणोरवं च एवं कं भूयो वायवनवच्छिन्नचक्षुः संयोगादि सत्त्वे प्रत्यासत्तेरावारणाय प्रत्य-
दिमत्य कं भूयी वायवयवावच्छिन्नचक्षुः संयोगत्वादिना हेतुत्वे गौरवमिति तदपेक्षया लाघवेन विजाती-

४

रम

३

यवन्तु: संयोगाश्रयेवद्रव्यचाक्षुषहेतुत्वं वाच्यम् उक्तरूपत्वेन तन्मात्रवादेवतेनोक्तापत्तिरेवं चालोकसंयोगस्य
महत्त्वोद्भूतरूपवतोश्च हेतुत्वमनर्थकं वैजात्यस्य फलबलकल्प्यत्वेनांधकारे घटादिचक्षुः संयोगे वै
जात्यानभ्युपगमात् प्रसंगोऽवाप्युक्तः एवं चक्षुः संयोगेऽपि वैजात्यानभ्युपगमात् विजातीयचक्षुः सं
योगरूपकारणविरहादेव तत्कार्यापत्तिविरहात् इति स्थित्वेनांधकारकालीनचक्षुः संयोगाश्रयेवालोकस
मवधाने प्रत्यक्षजनकत्वेनाभावप्रत्यक्षे विजातीयचक्षुः संयोगवद्विशेषणतायाः प्रत्यासत्तित्वेन भू
तलादावधकारप्रत्यक्षानुरोधेन चांधकारेऽपि घटभूतलादिचक्षुः संयोगे वैजात्योपगमस्यावश्य
कत्वेन घटभूतलादिचाक्षुषवारणाय तत्रालोकसंयोगहेतुत्वस्यावश्यकत्वाच्च एवं मतेऽप्येव द्रव्यक्रि
याघटादौ प्रसंगो दुर्वारश्चक्षुः संयोगजातत्वं तत्र वैजात्यनियामकस्यैकत्वेन घटादिचक्षुः संयोगादा
विव प्रसंगादिचक्षुः संयोगेऽपि वैजात्योपगमस्यावश्यकतया प्रसंगादिस्तत्प्रत्यक्षवारणाय महत्
त्वोद्भूतरूपयोश्चाक्षुषहेतुत्वमावश्यकम् न च घटादिरूपतानद्भूतादेरेतस्यापि विशिष्य वैजात्य
वदिन्द्रहेतुत्वमुपेत्य वैजात्यस्य प्रसंगवादिचक्षुः संयोगसाधारणेऽपि सिद्धिरिति वाच्यम् एवं
तद्धेतुत्वकल्पनामपेक्ष्य महत्त्वोद्भूतरूपयोर्हेतुत्वकल्पनस्यैवौचित्यात् क्रियाकर्मजस्य संयो
गजस्य च चक्षुः संयोगस्य चाक्षुषजनकतया कर्मजन्यतावच्छेदकसंयोगजन्यतावच्छेदकजा

तिस्यां संकरान्नोक्तजातेर्जातयकल्पना संभवः नच कर्मज एव संयोगस्यानुपपत्तेस्तन्नीलनादि
क्रियानुविधानादिति वाच्यम् चक्षुःसंयुक्ते कपालादावुत्पन्नेन घटादिना संयोगजस्यापि
चक्षुःसंयोगस्य संभवादिति चेदत्राहुः आत्मादेरूपाद्यभावस्य चाक्षुषत्वे आत्मादिवृत्ति
चक्षुःसंयोगस्यापेक्षणीयत्वात् आत्ममनःसंयोगसाधारणीं वृत्तिं जातिं कर्मजन्यतावच्छेदकं जाति(
व्याप्यमेव आत्मादेश्चक्षुरादिसंयोगस्य कर्मजस्यैवासंभवात् नचात्मादिसंयुक्ते चक्षुष्युत्पन्ने
जातस्य चक्षुरादेः संयोगजोप्यात्मादिसंयोगः इति वाच्यम् तथाप्यात्ममनःसंयोगस्य कर्मज
त्वनियमादिति बहिरिन्द्रियप्रत्यक्षे चोद्भूतरूपत्वेनैव हेतुत्वं नीलत्वादिव्याप्यानुद्भूतत्वाभा
वकूटरूपस्योद्भूतत्वस्य कारणतावच्छेदकत्वे विशेष्यविशेषणभावे विनिगमनाविरहेण कारण
बाहुल्यादवच्छेदकगौरवाच्च अनुद्भूतरूपाभावस्य स्वातन्त्र्येण हेतुत्वाच्चक्षुरादीनां न प्रत्यक्षम्
एवं द्रव्यस्पार्शने उद्भूतस्पर्शाभावस्य हेतुता कल्प्यते तेन प्रभायां न स्पार्शनम् द्रव्यस्पार्शने
स्पर्शस्य च न हेतुत्वं तिः स्पर्शानां गगनादीनां नीरूपत्वे न रूपहेतुत्वे पत्येव प्रत्यक्षत्वापत्तेः तत्र हे
तुतायां कारणस्य प्रत्यासत्तिः समवायः कार्यस्य तुद्भव वृत्तिर्लौकिकविषयता कार्यता
वच्छेदकं च बहिरिन्द्रियप्रत्यक्षत्वं तत्र समानसामग्र्यसत्त्वम् मानसान्यत्वविशेषणादात्ममानसेनाव्य(

दै

६ तम

२

हलइतिलकारः अलहलवलरलझलशलसंज्ञार्थः पुनर्हकारोपदेशास्तुवलरलझलशलसु
हकारग्रहणार्थः हदिहि स्वपिहिरुदादिभ्यइतिवलादिलक्षणइट् स्निहित्वास्नेहित्वानत्क्वासेडि
तिनिषेधबाधित्वारलोव्युपधादितिवाकित्वम् अरागधांप्रत्वस्यासिद्धत्वेपिहकारस्यझलत्वात्झ
लोझलीतिसलोपः अलिदन शलइतिक्सः ननुपुनर्हकारोपदेशस्यावश्यकत्वेपिशर्मध्येएवहका
रंपठित्वा अलोंत्यस्य हलोनन्तराःसंयोगः झलोझलि लइगुपधेत्यादिसूत्राणिप्रावर्तिलानुबंधानि
तावति अरोंत्यस्य हरोनन्तरासंयोगइत्येवंरूपेणसूत्राणिबंधान्येवचकृतानि हलितिपृथक्सूत्रंन्यस्य
नाममेवम् तथाहिसतिहरीहसतिहरीहरिरित्यादिनसिध्येत् तत्रखरवसानयोर्विसर्जनीयोवा
शरीत्यादिप्रसंगादतोहलितिसूत्रमावश्यकमेव एवंचहलितिसूत्रेंत्यमितिवक्ष्यमाणग्रंथोपि
स्वरसतस्संगच्छते अणादिसंज्ञार्थानीति अणादिसंज्ञाअर्थःप्रयोजनंयेषांतानीतिविग्रहः अणादि

४

संज्ञाभ्य इमानीत्यस्वपदविग्रहो का अर्थेन नित्यसमासो विशेष्यलिंगता चेति वक्ष्यमाणत्वात् एषामेत्याद्
नइति एषां सूत्राणाम् अंत्याणादयो हलंत्यमनुपपदं वक्ष्यमाणेनेत्संज्ञेकादेत्यर्थः अकारश्चेति अनंत्य
त्वात् नु प्रवृत्तिः वचनविपरिणामेन इदिति संबध्यते इत्संज्ञा वास्तु उपदेशेजनुनासिक इत्यनेन एवं
वाणादिभिरादिरंत्येनेति वक्ष्यमाणेन प्रत्याहारग्रहणादणादिसंज्ञार्थानीति पदुक्ते संगच्छते इति भावः
अकार उच्चारणार्थ इति ननु लण्सूत्रस्याकार इव प्रयोजनार्थ इत्यर्थः हलंत्यम् अंतेऽवसाने भवं
अंत्यम् दिगादित्वात् यत् उपदेशेजनुनासिक इत्यत उपदेश इति चानुवर्तते आदिरंत्येनेति सूत्रे
ण सहान्योन्याश्रयमाशंक्य आवृत्त्यातत्परिहरति हलितिसूत्रेऽत्यमिति हलि अंत्यमिति विग्रहे स
प्तमीतियोग विभागात्सुप्सुपेतिवा समास इतिभावः पक्षे षष्ठीतत्पुरुषो वा हलितिसूत्रस्यांत्यमित्या
ख्यानसंभवात् आदिरंत्येनसहेता अंत्येनेति किं सुडिति प्रत्याहारः तत्रैकवचनादयवे नमा

राम
४

मू. दितिकाशिकाकृत् यद्यपि टकारांतसंघस्य टाटकारोप्यंतो भवति तथाप्यंतेति ग्रहणसामार्थ्यादंत्यत्व
प्रयुक्तायस्येत्संज्ञानेनैव प्रत्याहारः नहि टटकारे हलंत्यमितीत्संज्ञा प्रवर्तते नचैवं रप्रत्याहारसिद्धेः लसू
त्रस्थावर्णस्यानुनासिकत्वप्रतिज्ञासामार्थ्यादनेनैवानापि इत्ना प्रत्याहारः सिध्यति इति ग्रंथ
काराशयः निष्कर्षस्त्विह स्वौजसमौडिति सूत्रे दर्शयिष्यते विस्तरस्तु शब्दकौस्तुभे ऽनुसंधेयः इ
नेति किं रप्रत्याहारो यथा स्यात् स ह्यनुनासिकत्वप्रतिज्ञासामर्थ्यादनेनेनापि इत्ताग्रहणं इत्युक्तम्
नचैतादिते ऽन्येन स्य विरहे लस्यते इति शब्दकौस्तुभे स्थितम् अज्जाद्यंताभ्यामवयवाभ्यामवय
वीसमुदाय आक्षिप्यते तस्य युगपल्लंडेप्रयोगाभावात् अवयवे अवतरंति संज्ञामध्यगे भुविभ्रा
म्यति न त्वाद्यंतयोः संज्ञास्वरूपांतर्भावे एतयोः परार्थ्ये निर्णयादिप्रयाशयेनाह मध्यगानामिति स्व
स्य चेति स्वं रूपमित्यतोऽनुवर्तते इति भावः स्वं रूपं वा दरिकेण गृह्यते नांतयस्य अंत्येनेत्य प्रयानत्

तीयाविर्देशास्त्वनाम्नामुत्सर्गतः प्रधानपरामर्शिकत्वात् ननु स्वमित्यस्यानुवृत्तौ कः संज्ञीत्याकांक्षायाः शांत
तत्वादष्वक्यात् नेयो नस्यात् तथाचद्कोयणचीकात्यादाविकारस्यानेयकारः स्यात् अकारेपरइत्ये
वमर्थः स्यान्मैवम् आदेरेवसंज्ञित्वेतु आदिरित्येनेतिसंज्ञाकरणस्यवैयर्थ्यापत्तेः किंचाऽण्अ
क् अच् अट् अम् अशादीनां प्रत्याहारग्रहणे विधत्य र्थः स्यात्सर्वत्राकारस्येव संज्ञित्वादितिदिक् अधेना
वयवद्वारासमुदायानुकरणेनसिद्धेः अंतसूत्रमिदं स्वत्रमितिस्थितम् उपदेशेऽन्त्यं हलिति उपदेशेकिं अग्निचित्
सोमसुतः अग्निकाशिका अत्रत्संज्ञायालोपस्यात् नचकोचैयर्थ्यं भागस्वेत्यादौ चरितार्थत्वात् नचक्रियः चित्वस्यवैय
र्थ्यं अग्निचितादृत्यादौचरितार्थत्वादितिहरदत्तः अंत्यं किं मतिनो मकारस्य माभूत्सत्त्वां हीसंज्ञाया अंत्यादचः परः
स्यात् वेश्मसद्मसर्वधातुभ्योमनिनहलित्तिकिं भूसत्तायां भविता नचअप्रमोजनाभावान्नेत्वमिति वाच्यमसत्या
मित्संज्ञाया मूदितइतिकूडुक्ल्यत्नापत्तेः अन्नेतु विदिरणे तिजिरिणेतिइह धातोरंत्यस्यमाभूत् सत्यामित्सं
ज्ञायामिदितइतिनुमस्यादित्याहुः उपदेश आद्योच्चारणमिति आद्योच्चारणविशेषाभ्यतोमोशव्दत्वासांत्यहलि

संबंधाने सचपदार्थविषयो सकृत्तेन प्रतिषेधो विकल्पश्चनवाशब्दार्थः संज्ञी विभाषाशब्दार्थो विकल्पः संज्ञा उभयत्रविभाषार्थे चेदमू
त्रे प्राप्तविभाषायामप्राप्तविभाषायां च नास्योपयोगः प्राप्तविभाषाशास्त्रस्य सिद्धत्वेन विभाषाशब्दत्वायप्राप्ते भवतीति भावांशमनूपपद्यते न भवतीत्य
भावांशमात्रकरणात् अप्राप्तविभाषायां तु भावांशस्य सिद्धत्वेन प्राप्ते न भवतीत्यभावांशमनूद्य प्राप्ते भवतीति भावांशमात्रकरणात् विभाषेति बा
तुभयत्रविभाषायां तु यदि विधिमुखेन प्रवृत्तिस्तर्हि विधित्वे वर्त्तसंप्रसारणविकल्पः स्यात् किंतु न यणादित्वाद् द्विविधत्वादीतिनित्यमेव स्यात् अथ प्र
तिषेधमुखेन प्रवृत्तिस्तर्हि किं त्वेव ... : स्यात् निषेधे नच विधित्वविधिमुखेन किंतु निषेधमुखेन तु भयथापि प्रवृत्तिरस्त्विति वाच्यं
वैरूप्यलक्षणवाक्यभेदप्रसंगात् संज्ञाकरणे तु श्रुतक्रमानुरोधेन नेति प्रतिषेधः प्रथमं किंतु प्रवर्त्तते ततः किंदविद्रूपे सर्वस्मिन् लिटि
एकरूपेप्राप्ते सतिपक्षे भवतीत्येकरूपेण विधिमुखेनैव प्रवर्त्तते इतीति किमर्थं संज्ञा वक्तव्यरूपमिति वचनाच्छब्दस्य संज्ञामा... तथा
हि सति विभाषाशब्देनेत्यत्र नवा शब्दः श्वयतेर्ऽदेशस्त्वर्थः स्यात् इति शङ्कते सति अर्थः संज्ञीति लभ्यते तथा हि लोके ह्यर्थः प्रधानः शब्दः
गौरित्ययमाहेत्यादौ तु शब्दस्वरूपपरः संपद्यते व्याकरणे तु स्वं रूपमित्यपरिभाषणात् स्वाहूयपरत्वमेतस्मात् किं इति शब्दस्याभिव्याहारे तत्र बोध्यते ति भो
विशेषः इदमेवेतिशब्दस्य पदार्थविपर्यासकत्वं नाम संज्ञात्वमर्थस्येव न तु विभाषाशब्दस्येति व्याख्यानस्य हेतोः ... रोवेह
... फलं उभयत्रविभाषाहितत्सूत्रं अभ्यवपूर्वस्य हरतेर्भक्षणार्थत्वात् विकारार्थस्य कर्तरि कर्मकत्वाच्च गतिबुद्धीत्यादिना अ
णौ कर्तुर्णौ कर्मत्वे प्राप्ते अर्थान्तरे चाप्राप्ते नदारंभात् उत्पन्नं च भाष्ये प्राप्ते तावत् अभ्यवहारयति सैंधवान् अभ्यवहारयति सैंधवैः
विकारयति सैंधवान् सैंधवैः अप्राप्ते तु हरति भारं देवदत्तः हारयति भारं देवदत्तं हारयति भारं देवदत्तेन करोति कटं देवदत्तः कारयति
कटं देवदत्तं कारयति कटं देवदत्तेनेति दिक् स्वं रूपं शब्दस्य अनेर्दक् आनेयम् आञ्जेयमहन्ः आयच्छते आहते इहानि... प

विकारयति

महत्त्वन एत एव संज्ञिनः तन्त्रान्तरादिवाद्यादिङ्कारादेङ्गार इत्यत्ययो न संभवतीति त्वसाद्याद्देवत्वात्प्रातिपदिकादित्यधिकारान्न किमनेस्तूले णेति चेन्न

त्वं आन्यादिशब्दपर्यायेभ्यो वन्यादिभ्यो माभूदिति सूत्रस्यारंभः ननु स्वरूपग्रहणं विनापि स्वशब्देन रूपमेव गृह्यते प्रतीता उपदेशान वेत्ता

त्वा दशाधारणत्वात् तंत्रांतत्वाञ्च यतो पस्थितिकत्वाच्च अर्थो हि प्रतीतेः संबंधग्रहणमपेक्षते पर्यायैः प्रत्यायनात्साधारणः पदज्ञानजन्य

बोधविषयत्वाद्बहिरंगः अनुकरणादयात्यामप्रतीतेरनियतोपस्थितिकश्चेति किमनेन रूपग्रहणेन उच्यते रूपग्रहणात्केषांचिदर्थोपि विवक्षितो

रूपवदिति ज्ञापनार्थं रूपग्रहणं तेनार्थवद्ग्रहणेनानर्थकस्येत्युपपन्नं भवति नयो ज्ञस्यापकादर्शनाद्याहुः स्वमिति वचनात्स्वं रूपं चेति

सामर्थ्यादर्थवतो रूपग्रहणं तेन काशे कुशो इत्यत्र शो इत्यस्य ग्रहणं सिद्धं तो न भवति प्राङ्गुह्योडङ्गन्यत्र तु उदग्रहणे न कोनमेव ग्रहणं इति ननु रू

वत्वं स्येकदेशहृत्यन्यत्र विस्तरः अशब्दसंज्ञेति किम् उपसर्गे घोः किः दाधाघ्वोर्यथा स्यात् घुसंज्ञा शब्दार्थिका माभूत् न च दाधाध्वि

ति घुसंज्ञाकरणे सामर्थ्यादेव दाधाभ्यः किः स्यादिति वाच्यं घुमास्थेत्यादिनाऽऽनईत्वादि विधौ संज्ञाकरणस्यावश्यकतया सामर्थ्या

पक्षपातात् इह शब्दस्य संज्ञा शब्दसंज्ञेति न षष्ठीसमासः कर्मण्यणित्यादिषु कर्मसंज्ञा प्रसक्तरूपग्रहणप्रतीतेः किं तु शब्दः शब्दस्य संज्ञा तत्र संज्ञा

शब्दसंज्ञेति सप्तमीसमासस्तदाह शब्दशास्त्रे या संज्ञेति येन विधिः विधिरित्युपसर्गे घोः किरिति कर्मणि किप्रत्ययः येनेति करणे तृती

या ननु कर्तरि तस्याः कृपोऽकारवाधात् नञो भयथासी कर्मणीति नियमेन निर्वाहः कर्मण उक्तत्वेनोभयप्राप्त्यभावात् तथा चात्रक

रणे तृतीयैव करणं च परतंत्रं कर्तृविधिविनत्स्येव करणत्वात् एवं चेह तृतीया यथाप्राप्तं लभ्यते न च एरजित्यादाविकारादीनां प्राप्ते

रंभात्वादीनां च व्यानिर्देशं वार्ययिति नामिव तत्राप्यनापि च संभवति किं तु वैवक्षिकं तेन विशेषणमप्रधानं तत्र च्चान्तत्वस्य संज्ञेति फ

लितं तदेतदाह विशेषणं तदन्तस्येति स्वस्य चेति स्वं रूपमित्यनुवर्तते तल्लभ्यते एरच् इकारान्तादिकारान्ताद्धातोरच् चयः जयः

समासप्रत्ययविधाविति कुम्भंश्रितः कुम्भश्रितः नेह कुम्भमुपश्रितः नडादिभ्यः फक् नडस्यागोत्रापत्यं नाडायनः नेह सौत्रनाडिः
अत्र शितिकादित्वादुभयपदवृद्धिः उगिद्वर्णेति उगिद्वर्णग्रहणं वर्जयित्वा उगिद्वर्णग्रहणवर्जं द्वितीयायां तेन णमुल् महांतमतिक्रां
तिमहती महच्छब्दस्य गौरादित्वेप्युपसर्जनत्वेपि विधिर्ङीषेरेति ङीषोऽप्रवृत्ते उगिदंतान्ङीप् अत इञ् दाक्षिः नवेह सामर्थ्यात्तदंतवि
धिः अस्यापत्यं इः कामइत्यत्र चाप्रीतार्थत्वात् नचैवमिनोऽजेत्वं यथार्थमितिवाच्यं वक्तादिभ्यश्चेत्यत्र यथाययथं गुणाद्युदात्तार्थम्
चीतार्थत्वात् नचैवमपि श्रौपगव इतिस्यादेव अतइत्यस्यानन्तरादित्यादौ अकारस्येहानर्थकत्वादितिचेन्न वर्णग्रहणेऽत्रा
र्थवद्ग्रहणपरिभाषाया अप्रवृत्तेः विरामोऽवसानम् विरमणं विरामः भावे घञ् शब्दानुशासनप्रस्तावात् वर्णानामिति संज्ञाप्रदे
शाववसाने इत्यादयः अभावस्यापि बुद्धिकृतं पौर्वापर्यमस्त्येव यथोच्चरितप्रध्वंसिनां नित्यविभूनां वर्णानां यथा विरम्यतेऽनेने
ति विरामः बाहुलकात्करणे घञ् यदुच्चारणोत्तरं वर्णान्तरं नोच्चार्यते सोन्त्यवर्णोऽवसानमित्यर्थः अस्मिन्नुपक्षे खरवसानयोरि
त्यत्र कापि सप्तमी विषयसप्तमी घटते खरि परे रेफस्य विसर्गः अवसाने च रेफस्यानीति बुद्धिरिङ्गिते पदं अत्रांतग्रहणमन्यत्र संज्ञाविधौ
प्रत्ययग्रहणेऽनर्थत ग्रहणं नास्तीति ज्ञापनार्थं तेनईदूदेद्द्विवचनं प्रगृह्यमिति द्विवचनान्तस्य प्रगृह्यसंज्ञा अन्यथा कुमार्योरगारं कुमा
र्यगारमित्यत्र प्रकृतिभावः स्यात् कथं तर्हि प्रातिपदिकसंज्ञायां कृत्तद्धिताभ्यां नदंतग्रहणमितिचेन्न अत्राहुः कृत्तद्धितेति सूत्रे अ
र्थवद्ग्रहणमनुवर्तते तत्सामर्थ्यात्तदंतग्रहणमिति हलोऽनंतराः संयोगः लघ्वर्थमेकाज्झल्संज्ञायां कर्तव्यायां संयोगसंज्ञेति महा

15

त.
६

संज्ञाकरणं सवर्णसंज्ञाविधानार्थं संयुज्यन्ते ऽस्मिन्समुदाये वर्णा इति निपातनात्समुदाये ज्ञापकं परिभाषितं गुणाणां बह्वादि संज्ञावत्
त्येकं तथा हि सति दृषच्छिनत्ति इत्यत्र षकारहल्लियोर्दकारस्य संयोगान्तत्वं संयोगान्तलोपः स्यात् निर्यायादित्यत्र यकारः संयोग इति वा
न्यस्य संयोगादेरित्येवं स्यात् सिद्धान्ते त्वचोरप्राप्तिति च्छित्वे सत्यपि तस्याभिद्वत्वादेत्वमत्र न भवति हल इति जातौ बहुवचनं जात्याख्या
यामेकस्मिन्निति वचनात् तेन द्वयोरपि संयोगसंज्ञा भवतीति हल्ल्यादौ हल इत्यप्रत्ययः तिष्ठति यत्र बहवो हलः संश्लिष्टाः
तत्र द्वयोर्बहूनां वा विशेषणं सत्वेति स्थितमाकरे यदि तु बहूनामेव स्यात्तर्हि गोमान्करोतीत्यत्र मतुपतकारस्य संयोगान्तलोपो न स्या
दितिदिक् हलः किम् तितउच्छ्यात्र तनोतेर्डउः सन्वच्चेति डउप्रत्ययः सन्वद्भावाद्द्वित्वं सन्यत इतित्वेच अल्लोपाणं तस्माद्यच्छा
तगणाभावः यदि त्वचोरपि तयोः संयोगसंज्ञा स्यात्तर्हि इहसंयोगान्तस्येत्युकारलोपः स्यात् अनन्तरा इति किम् पनसं यदीहसका
रमकारयोः संयोगसंज्ञा स्यात्तर्हि स्कोरिति सलोपः स्यात् ॥ इति संज्ञाप्रकरणं वृद्धिरादैच् यत्र साक्षात्स्थानी न निर्दिष्टः
सार्वधातुकार्द्धधातुकयोः सिचिवृद्धिरित्यादौ तत्रैवेयं परिभाषा प्रवर्त्तते नाचो ञ्णितीत्यादौ स्थानिर्देशेन गुणवृद्धिशब्दाभ्यामिति
एतच्च पूर्वेषां सम्मतं गुणवृद्धिपदेनुवर्त्ते गुणो वृद्धिरिति योजनया लभ्यते तेन हन्त्यदादीनाम् इमं दिव औत् यो विधीयत इति य
त्रत्वनुवादे वृद्धिपर्याचामादिरित्यादौ तत्रेकः इति नोपतिष्ठते अनुवादे परिभाषाणामनुपस्थितेरिति भावः अनुवादे परिभाषाणा
मित्यस्यानुमानविशेषबलेत्यर्थः अनुपस्थितौ लिङ्गं फलं चोदीचामातः स्थाने इत्यत्र स्फुटीकरिष्यते षष्ठ्यन्तमिति सूत्रे षष्ठ्यं
तस्यानुकरणात् शब्दस्वरूपपरतया नपुंसकत्वासौल्कि अत्वसंतस्येति दीर्घो नेति भावः पदमिति तदन्तसंभवति मामानाधिकर

16

ए.स
६

न०

१

18

पति अंत्यादचः परोमित्स्यात् इति प्राचो व्याख्यायां नैतत्सिध्येत् शेमुचादीनामित्यत्रोत्पत्त्याचोऽसंभवेन मित्त्वपरिभाषाया अनुपस्थिति
प्रसंगात् अन्येत्वचेत्यात्यो मित्स्यादिति व्यत्यासेन योजयित्वा प्राचो व्याख्यामपि कथंचित्समर्थयंते पूर्वसूत्रादेतदन्यत्र वर्त्तते एकदेशे
स्वरितत्वप्रतिज्ञानादन्ये व्याचख्युः अंत्यावयव इति तेन वारिणीत्यादावंगस्य नांतत्वे न दीर्घः सिद्धः पादादित्वेन सिध्येत् अभक्तत्वेतु वहं
लिह इत्यत्र वहाभ्रे लिह इति खशि अरुर्द्विषदिति मुमि सो नुस्वारो न स्यादपदांतत्वादिति भावः यत्तु केचिदुक्तं अभक्तत्वे वारीणीति
दीर्घो न स्यात् इति तत्तदादिग्रहणं स्यादिति नुमधीमिति अंगसंज्ञासूत्रस्य वार्तिके नैव दूषितप्रायम् षष्ठी स्थानेयोगा [illegible] इति वि
ग्रहः निपातनादेवं षष्ठ्याः संबंधमात्रवाचित्वे पीह शास्त्रे यावत्षष्ठीसा स्थानेयोगा बोध्या किमविशेषेणेत्याह अनिर्द्धारित संबं
धविशेषेति अनिर्द्धारितेति किं उदुपधायागोहः शासइदङ्हलोरित्यादावुपधासन्निधाने नावयवषष्ठीत्वे निर्णीते गोहः शासइ
त्यादौ माभूत् सन्निहितस्यापि स्थानेयोगत्वे गोहि शास्तिस्थाने धातुमात्रस्योपधायाश्च स्थाने ऊदित्वे स्यातामिति दिक् स्थाने च प्रसं
ग इति न चास्य प्रसंगार्थकत्वे विवदितव्यम् दर्भाणां स्थाने शरैः प्रस्तरितव्यमित्युक्ते दर्भाणां प्रसंग इति प्रतीतेः एवं चेकोयणचि
त्यादावित्युच्चारणप्रसंगे यण्स्युः यणोच्चारणप्रसंगे इत्याद्यर्थः संपद्यते स्थाने ऽन्तरतम इति अर्थात्प्राप्यमाणानां मध्ये एव अतए
वांतोदकमित्यत्र त्रिमात्रऊकारो न इह स्थाने न्तरवर्तमाने पुनः स्थानेग्रहणं इन्द्रो पि बाध्याभावे संमतः तात्वादिरूपे स्थाने
यो न्तरतमस्तत्प्रयुक्तां तदर्थं वाच्य इति स प्राप्यमाणानां मध्ये स्यादिति नवेत्याह यत्रानेकविधमिति स्थानार्थगुणप्रमाणतः
स्थानार्थविधमित्यर्थः स्थानतो यथा दध्यत्र तालुस्थानस्येकारस्य तालुस्थानो यकारः अर्थतो यथा पानाते म्म युवतिः वतंडस्यद्यं

न

रम

हुतंड्राक्षेति गोत्रापत्ये यञ् तस्य लुक् स्त्रियामिति लुक् शार्ङ्गरवादित्वात् ङीन् वतण्डी चासौ युवतिश्चेति विग्रहे पोटायुवतीत्यादि
ना समासः पुंवत्कर्मधारयेत्यतिदिष्टमानत्वं शब्दो वतण्डापत्यवाचिनो वतण्डीशब्दस्य तदपत्यवाची वातण्ड्यशब्दो भवति ननु वतण्डा
दिः गुणितो यथा वाग्घरिः घोषवतो महाप्राणस्य तादृश एव घकारः प्रमाणेनो यथा अमुं अमू अमून् अदसोऽसेरिति तेन ह्रस्व
स्य ह्रस्वो दीर्घस्य दीर्घ उकारः तमपग्रहणे किम् वाग्घरीत्यत्र झयो होऽन्यतरस्यामिति पूर्वसवर्णे क्रियमाणे महाप्राणत्वसा
म्येन द्वितीयो नादवत्वसाम्येन तृतीयश्च मा भूत् किंतु नादवान्महाप्राणश्चतुर्थो घ एव यथा स्यात् इति वलो यदिति तेन चेता
स्तोतावृत्यत्र प्रमाणेन आन्तर्यं वा त्रकारो नेति भावः तस्मिन्निति सप्तम्यन्तानुकरणमिदं निःशब्दो नैरन्तर्यपरः इहोच्चारण
क्रियाऽविपत्तिरुक्ते अव्यवहिते व्यवहिते च सति प्राप्तमव्यवहितेन एवेति पूर्वस्य परस्य च प्राप्ते पूर्वस्यैवेति नियम्यते अव्यवहितस्
स्येति तु फलितार्थकथनं पूर्वस्यैवेति दध्युदकं अन्त्रोकारस्य मा भूत् अव्यवहितस्य किम् अग्निचित् सोमसुत् व्यवधानं चात्र
कृतमेवेति विज्ञेयं ननु कालकृतं संहिताधिकारान्नापकारात् अन्यथा निर्दिष्टग्रहणे देवासंहितानां मन्त्रणाद्यप्रसंगात् किं ने
नसंहिताधिकारेण अनेन व्यावर्त्यं नैपाति एवं च संहिताधिकारे बहिर्भूतविषयः कालव्यवायोऽपि संभवति तेनाग्नाविष्णू इत्य ये
ना विष्णू इत्यादावन्यत्र आनङ् ऋतो द्वन्द्वे देवता द्वन्द्वे च इत्यादिना उत्तरपदे परे पूर्वो विहितः आनङ् हृदये मन्तीति तिदिकुः तस्मादिति वं
उत्तरस्य किम् तिङ्ङतिङः इति निघातस्तस्येव यथा स्यात् अग्निमीळे पुरोहितं अग्निं अव्यवहितस्येति एतच्च निर्दिष्टग्रहणानुवृ
त्या लभ्यते तेनऽत्र तेषामतौ उत्सोऽतंभमनमित्यादौ उदः स्थेति पूर्वसवर्णो न प्रवर्तते अलोऽन्त्यस्य षष्ठीनिर्दिष्टस्य यदुच्यते सोऽन्त्यस्या

19

लः स्थाने स्यादित्यर्थः त्यदादीनामः सः यः स्थानषष्ठीति किम् आर्द्धधातुकस्येट् न त्वस्य कारपूर्वोऽमाभूत् इदं च षष्ठीस्थानेऽ
त्यनुवृत्त्या लभ्यते अलः इति किं पदस्येत्यधिकृत्य विधीयमानं वसुस्रंस्विति दत्वं परमानडुहामित्यादावंतस्य पदस्य मा भूत् इ-
दमप्रत्ययमपीति अवङ् स्फोटायनस्य गवाग्रम् अनडुहौ सहव्वा परस्येति तस्मादित्युत्तरस्यादेरिति तु न सूत्रितं आदेशित्वं
षाष्ठ्यस्य सर्वादेशबाधकत्वापत्तेः शिन्नं तेनु पात्त्वात्सर्वादेशत्वं सिध्यति न त्विति किमनेकालग्रहणेन न चालोन्त्यस्येत्यंत्यस्य
स्यादिति शंक्यं बाधकमित्यनुपदमेव वक्ष्यते आदेर्वोध्यमिति आदेरलो बोध्यमित्यर्थः अल इत्यनुवर्तते अनेका
ल् अस्तेर्भूः बभूव ननु निर्दिश्यमानस्यादेशा भवंतीत्यनेकाल्त्वादेशस्य सर्वादेशत्वं शि-च्छे त्यस्य नियमार्थत्वानुपपा
मात् उच्यते अनेकाल्ग्रहणाभावे इदमो इत्यादावेशादेशः आदेः परस्येति मकारस्यैव स्थाने स्यात् ननु सर्वस्येत्यस्या
न इति दिक् शित्तूदाहरणे इदम इश् इतः इत्यादाविति आदिशादेः नन्वनोभिस एस् इत्यादि गृह्यते परत्वादिति अत एवा
दः परस्येति पृथक्कृतिर्यतस्तु र्क नन्वनेकाल्शित्सर्वस्येत्यतः प्रागेव तस्मादित्युत्तरस्यादेरिति पठ्यतां किमनेन पृथ
क्सूत्रकरणेन न चैवं तस्मिन्निति निर्दिष्टे इत्यतो निर्दिष्टग्रहणं नात्रानुवर्तते तिवाच्यम् तथापि सूत्रस्य प्राक्पठनेन बा
धकाभावेन निर्दिष्टग्रहणानुवृत्तिसिद्धेः मैवं ब्राह्मणोऽभ्यक्षेत्यत्र अपवादः पूर्वयोरपि जसशसोरोश प्रवृत्तात् यथाप्र
तरूणां भूयाभेनुतरस्येत्यंशः प्रवर्तत एवेति नायं दोषः प्रयुज्यते इति अत्र केचिन्निष्कर्षमाहुः अनेकाल्शित्सूत्रा(
प्राक्पठित्वा चायतस्मादित्युत्तरस्यादेरिति सूत्रिते परत्वात्सर्वादेशेन आदेरित्यपवादविषयेऽबाडुत्तरस्येत्यंशस्यापि
बाधितत्वात् पूर्वसंस्कारपक्षे ब्राह्मण अग्रे अप्येक्षा स इति स्थिते अपवादस्य त्वस्यादित्योगे पंचमीत्वादपाणिन्यायेन

न

ङ्नोंगात्पूर्वयोरपि जसृशसोरेशस्यात् नापि स्यात्पक्षु प्राग्रीश्वरान्निपाता इति पाठेऽपि प्रत्यासत्तिन्यायेनाधिरीश्वरेतिसू
त्रावधिकत्वसिद्धावीश्वरेतोसुन्कसुनाविति सूत्रावधिकत्वनिराकरणपरे पि विशिष्य ग्रहणं कुर्वता सूत्रकृतैव ज्ञापितः ननु स्थान
वीदेशेनोनस्येत्यस्याबाधनार्थं निर्दिश्यग्रहणमनुवर्त्यमेव तस्मिन्निति निर्दिष्टे पूर्वस्येत्यत्र कृते ष्यादेरित्यस्य सर्वादेशबाधक
त्वं स्यात् तथा चानोभिस ऐसित्यत्र यादेशश्चादेरेव स्यात् अनेकाल्शित्सर्वस्येत्यस्यानिर्भूतत्वादेशाचरितार्थत्वात् यथा न्याये
तु जरस्येत्यंशाप्रवर्तेत एवेत्यषाभ्यः पयोरेव जसृशसोरेशस्यान्न तु पूर्वयोः तस्मादेरित्युत्तरस्यादेरिति न सूत्रितमित्या
दि मनोरमायं भ्रम्याद्यपमेवाशय इति अन्ये तु यथाश्रुतसूत्रनिरा करणपरतयैव मनोरमायां योजयन्ति तथा हि न
सूत्रितमित्यस्यानेकाल्शित्सूत्रात्प्राक् न सूत्रितमिति नार्थः आदेरित्यंशस्य सर्वादेशबाधकत्वापत्तेरित्याशयमिति ग्रंथ
विरोधात् किंतु तत्कृपयानेकाल्त्वाय यत्नं कर्तव्यमिति सूत्रान्तराकरणस्य विवक्षितत्वादित्यर्थो भवेयः एवं चानेकाल्शित्सूत्रात्प्राक्सू
त्रिते तु नात्स्येव दोष इति मनोरमाग्रंथाशय इति एवं स्थिते निर्दिश्यग्रहणे तु द्वितीयाभाष्यत सिद्धिरिति निर्दिष्ट इति सूत्रं तस्मा
दित्युत्तरस्यादेरित्यस्मात्प्रागेव पठनीयं अष्टनोंगात्पूर्वयोरप्योश्चस्यादित्युक्तेऽत्र चान्त्यं परिहरतो यः तस्मादेरित्युत्तर
स्यादेरित्यत्रादेरिति षष्ठ्यावाक्यं तत्रोनस्येत्यनुवर्तते सा च स्थानषष्ठी षष्ठी स्थानेयत्य प्रासे तत्र चायमर्थः पंचमीनि
र्देशे न यत्कार्यं तदुत्तरस्यैव स्थितत्तरस्य स्थाने षष्ठी यत्तेन तदादेर्भवतीति इत्थं वाक्यभेदेन व्याख्यानाश्रयणादनंतरस्येति
न्यायेनादेरित्यंश एव सर्वादेशेन बाध्यते न तूत्तरस्येत्यंशोऽपि नान्येव पूर्वोक्तदोषः वाक्यभेदेन व्याख्यानं तत्तरस्यादेरित्य
समलत्वात्सकलेन बाध्यते अन्यथा उत्तरादेरिति न सूत्रितमित्येव वदेत् किंच अष्टाभ्य इत्यस्य दिग्योगपंचमीत्वेन पू
र्वे पदस्य धारणेन वा अष्टनोंगात्स्यात्सुपूर्वस्येति पञ्चनोंगात्संज्ञाविभिन्नभूतो यो जसृशसोर्तावेव शीघ्रोपस्थितिः

तं०
९९

काविन्यषूत्रशब्दादुत्तरयोरेव ओोश्यान्तानुपूर्वे योरीति दिक् स्वरितेनाधिकारः अन्ये त्वंभूतलक्षणोत्तरीया अधिकारो वि
नियोगः किं यत्र तत्राधिकारे स्मरन्तु व्याख्यानमेव शरणं यथा आसमाप्तेर्माध्यायपरीसमाप्तेरधिकारः नन्वाप्राग्भ्यासविकारे
ष्वएवेत्यादि यत्र स्वरितत्वसम्पन्नं स्वरिते दृष्टे अधिकारो निवर्त्तनद्व्यर्थः कश्च स्वरितोऽधिकारार्थः कश्च न निवृत्त्यर्थ इत्य
त्रव्याख्यानमेव शरणम् नन्वेवं व्याख्यानादेवानुवृत्तिसिद्धेः किमनेन सूत्रेणेति चेत् अत्राहुः अर्थान्तरसंग्रहायेदं सूत्रं
कृतं तथाहि अधिकारोऽधिकारः अधिकं कार्यं गौणेऽपि शास्त्रप्रवृत्तिरित्यर्थः तथा च गौणमुख्यन्यायोपपन्नेष्यते अथ
दानाधिकरणो देनचस्वरितः पाठ्यः किंच अधिकः कारः कृतिरयं यत्पूर्वः सन्परं बाधते तथा च नमुच्चिरग्नज्वेद्दावेभोज
डित्यादि वक्ष्यमाणपूर्वविप्रतिषेधाः सर्वे संयहि नामर्थं ति तत्र स्वरितपाठे नैव गतार्थत्वादिति परनित्येति परान्नित्यं यथा तुद
ध्ये दिभ्यः शः तुदति रुधादिभ्यः श्नम् स च्छि परमपि लघूपधगुणं बाधित्वा नित्यत्वात् श्नम् तथा भिनवाव भिनवाम परमे
पिलोपश्च स्थानिवत्त्वान्मिजुकालोपं बाधित्वा नित्यत्वाद्गुणस्येत्यादि पादेन्तरंगं यथा उभये देवमनुष्याः इह प्रथमचरमे
तिपरमपि विकल्पं बाधित्वा सर्वादीनि इति सर्वनामसंज्ञा विभक्तिनिरपेक्षत्वेनान्तरंगत्वात् तथा त्मवतनोर्लिङ्गीति चडि ह्रस्वे
उपधायाः पादन्तरंगत्वाद्वृद्धेः असुरुस्तवान् पादस्पकादेशस्य परमप्यनेकाल्शित्सर्वस्येति सर्वादेशं बाधित्वा डिच्चेत्यंतादेशः इआदमे
शब्दि स्थानिवत् नित्यादन्तरंगं यथा ग्रामणीनीकुले नित्यमपि इकोचीति नुमं बाधित्वा ह्रस्वो नपुंसक इति ह्रस्वः कृतेऽगुणि
अनजं न त्वा ह्रस्वो न स्यात् अन्तरंगादपवादो यथा दैत्यारिः श्रीशः परमपि सवर्णदीर्घं बाधित्वा नरान्तरंगत्वाद्गुणो यणि च प्राप्ते
अपवादत्वात्सवर्णदीर्घः तथा ऽन्यः सुधियः इत्यत्र नरान्तादियङ्‌ उवङ् च प्राप्ते अपवादत्वादेरनेकाच इत्यो सुधीति
चपणं यत्रापवादोऽन्यत्र चरितार्थो लिङ्ग वा तरंगं बाध्यत एव तथाहि डिच्च इत्येतदनन्त्यापि ङ्कारादेकेषानडादिषु

राम
११६

चरितार्थत्वात्तत्र न प्रवर्त्तते किंतु परेणानेकाल्शि दित्यनेन बाध्यते जीवतात् भवतात् अयजे इंद्रं यामि इह सर्वे इत्यं

अत्र अयज इ इंद्रं या म इ इह सर्वे इ इत्यमिति स्थिते आंतरंगत्वात् तेन सवर्णदीर्घो बाध्यते तत्प्रसमानाश्रये देत्यादि: ओ शद

त्यो चरितार्थत्वात् असिद्धमिति तेन पचावेदमित्यादौ एत ऐ इत्येत्वेन अकृतव्यूह इति अकृत कार्य्यं इत्यर्थः एवं तर्हि सर्व

स्यपाश्रयस्य वैयर्थ्यं स्यादत आह निमित्तं विनाशोन्मुखं दृष्ट्वेति लोकप्रसिद्धार्थकथनमेतत् यद्वा अचरितार्थेनापि तत्कथ

नं उपपत्तेर्वितर्कार्थे ऊहः कार्य्य विशिष्ट ऊहो व्यूहः विनाशोन्मुखनिमित्तकं कार्य्यं अकृतो व्यूहो येन स अकृतव्यूह इति य

द्यपि कृतमपि शास्त्रं निवर्त्तयंतीति परिभाषार्थं तां पठंति फलं च तुल्यं तथापि अकृतव्यूहा इत्येव लघु प्रत्यालतानादि पं कस्य

रूपादप्यर्थनं वरं मितिन्यायादिति भावः न कुर्वंतीति यथा निष्टिद्रुधीमित्यादौ क्रसोरिट् मंतरंगत्वात् आप्तमपि विना संप्रस

रणेन वलादित्वं नंस्यतीत्यालोच्य न कुर्वंतीत्यर्थः इति परिभाषाप्रकरणम् ॥ इको यणचि प्रत्याहारग्रहणेषु तद्वाच्या वा च्ये

सुपरि शालत्तणा यूल्याव्यो नदीत्वादिप्यनन्न इति निर्देशात् तेन इक् शब्देन षट् पंचविंश व्यतेयणशब्देन चत्वारः भाष्यमा

नप्रत्याणः सवर्णग्राहकत्वात् एवं चेहयाणि तद्वाच्यवाच्येनि लृटल स णतुनश्च कैव भाष्यमानस्याण: सवर्णवाचकत्वा

भावेन यत्त्वाचाय यकारादि वाच्यानामभावात् अतो नाति यथा संख्येन च लस्यार्थवोधानपूर्वभाविशक्यार्थ ... तानमा

दाय यथासंख्यमत्त्विति वाच्यं एवमपि नजीयच तुर्ण्णाभ्यां अकारलकारान्यां प्रत्येकं त्रिंशद्रुपस्थितो लवर्णमारेपादेशस्य

लवर्णानां तादेश्यस्य च प्रसंगात् ... नाभादि हस्याने तु लनेम सूत्रे णैवेद्यहि द्वित्यमिप्रेत्यातु प दंचस्पतिस्थानन अंतर्य्यादिति

अचीति ... कस्मादचिपरे त्याकांक्षायां अच्यादिक इति संबध्यते संहितायां विषयइति दध्यत्र मित्यादौ कार्य्ये निमित्तमाक्षेप्त

23

भा.

त० वि
१२ त्य
त

निशयितः सन्निर्दिव स्यते तदेव पदं भवतीति भावः अनचिच यरोर्द्वेति यणोनुनासिक इति सूत्राद्यणो ग्रहणेनानुवर्तते अचो रहाभ्या
मिति सूत्राद्द्वे इत्यनुवर्तते दाह अवः परस्येत्यादि एवं चात्र वा ग्रहणेनुवृत्त्यैव सिद्धे त्रिप्रभृतिषु शाकटायनस्य सर्वत्र शाकल्य
स्य दीर्घादाचार्याणामिति सूत्र त्रयमारंभणीयमिति भावः अच इति किं नाद्दान्यमित्यादौ मस्य द्वित्वं मा भूत् अनचीति यदि वर्ण
द्वा तेः स्यात् ततो नकिंचिच्छुकमन्य सदृशो नथाहःशब्दजातिरिति व्याकरणे ऽच सदृशो वर्णे हलीत्यर्थः स्यात् ततो लाघवाद्धलीत्येव
वदेत् तस्मात्प्रसह्य प्रतिषेध एवायमित्याह नैवमिति एवं चाच स्थाने विहित्वं भवति वाक्वाक्कृ स्थानिवदादेशो आदेशे कृते स्वरूपभे
दात् स्थानिमत्कार्यं णप्रवृत्ता वतिदेश आरभ्यते अस्तेर्भू आर्द्धधातुके विवक्षितेस्थान्यादेशो धातुवत् तेनाचोयदित्या
दि धातुप्रत्ययाः भव्यम् बभूव किमः कः अणादेशो गवत् तेनदन्तादेशो दीर्घः संभावाः केन काभ्यां केः आदेशग्रहणं किमर्थं स्या
निवदित्येतावतैवं सर्वं विधि शब्दमहिम्ना तल्लाभात् यथा पितृवत् यान्ते स्थानिके पुत्र इति गम्यत इति चेत् अत्राहुः द्विविध आदेशः
प्रत्यक्ष आनुमानिकश्चेति अस्तेर्भूरित्यादि प्रत्यक्षः तेतृतीत्यादि स्थिवा तुमानिकः एकेत्यत्र हि इकारे लोकारो न स्थानी आनुमी
यते उकारेण चोकारो न आदेशः तथा च तेतृतीति फूलितो पीत्यत्रासत्यादेशग्रहणे प्रत्यक्षस्यैव ग्रहणं स्यात् आनुमानिकस्य आ
देश ग्रहणेन सामर्थ्यात्प्रत्यपसीयते तेन पचत्वित्यादेस्तिङन्तत्वात् पदसंज्ञा सिध्यतीति नन्वेवमित्यादि यथाश्रुतमेवास्तु एकदेश
विकृतमनन्यवदित्यनेन सिद्धमिति चेन्न अर्थवत्येव स्थान्यादेशभाव विश्रान्ते वाच्यत्वान्तस्यैव संभवात् तथाहि पष्ठीस्था
नेयोगेत्युक्तं स्थानं च प्रसंगः स चार्थवतः अर्थप्रत्ययनाच्छब्द प्रयोगात् यद्यपि च्लेः सिजित्यादाव संभवी तथापि

राम

तिसंभवेऽर्थप्रयुक्त एव प्रत्ते गोस्त्रियोरुपसर्जनस्येत्येनैवादेशाग्रहणेन न लभ्यते उक्तं च सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः एकदेशविकारे हि नित्यत्वं नो
पपद्यते इति पदमिहार्थवत् पठ्यतेऽनेनेति व्युत्पत्तेः यद्यपि सर्वे विकारेष्वपि सं नित्यत्वानुपपत्तिस्तथापि योऽयं विकारस्तत्कृतेति तात्पर्यं एतच्च शब्दकौस्तु
भे स्पष्टं अनल्विधाविति किम् पञ्चालाद्विधिः पञ्चालः परस्य विधिः पञ्चलो विधिः पञ्चाल्विधिस्तत्र माभूत् तत्रालविधौ यथा व्यू
ढोरस्केन अनस्यकारस्य स्थानिवत्त्वेन विसर्गवदट्त्वमाश्रित्याऽप्रत्ययोरिति णत्वं प्राप्नोति अलः परस्य यथा द्योः वेधा इह ल्घ्यादिलोपो न
अलो विधौ घुः कामः लोपो व्योर्वलीति लोपो न न चोत्वविधिसामर्थ्याद्वलोपो न भवेदिति निषेधं सुपानमित्यस्य सावकाशत्वात् अलि विधौ
पञ्चेन्द्रः करपः हशि चेत्युत्वे नचे हस्थानिवत्त्वेन जाते पुत्वे आकृणेन ऽदादेशे च कृते हलि सर्वेषामिति नित्यलोपे न क इष्ट इति रूपं सिध्य
त्येवेति वाच्यम् कथयिष्यतीति रूपं ततोऽसिद्धिप्रसंगात् विप्रतिषेधे कृते इष्टरूपसिद्धिरिति चारूपदक्षमपि प्रत्यन्ते अलचे हस्थान्यवपदएव गृह्यते
ते न ए मा येत्यादौ सुपिचेति दीर्घः सिध्यति न हि चौ हि पञ्चादित्वमाश्रित्यं गं चादेशो व मवे न तु स्थानावयवः तथा अहदि नामित्यादौ स्था
दिष्यः सार्वधातुक इति वलादिलक्षणमिट्सिध्यति तदन्तदाह नन्तु स्थान्यलाश्रयइति आयतां चेह यथा कथं चिन्तु प्राधान्येनेवे
त्याशयेह तेन प्रपठ्येत्यत्र वलादिलक्षणमिट्न अचः परस्मिन्पूर्वविधौ अचः किम् आगत्य वाल्यपीत्यत्र नालिक स्तु किं कर्तव्ये न
स्थानिवत् परस्मिन् किं आदीध्ये नित्यत्वादिट् एत्वं तच्च न परनिमित्तम् तेन वर्णयोरिति लोपे कर्तव्ये न स्थानिवत् पूर्वविधाव
ति किम् नेध्ययः निपूर्वाद्धाञ उपसर्गे घोः किः आतोलोपः इच इतस्थानिमइति ढक् आकारस्य स्थानिवत्त्वे तु अचत्वव्यपदेशेन ढा
चत्वंविरुद्धं द्वाध्येत नहिद्विपुत्रो द्विपुत्रव्यपदेशं लभते नन्वेवमपि विधिग्रहणं व्यर्थं पूर्वस्मिन्नितिपञ्चम्याकार्ये कर्तव्ये इत्यर्थं स्याहेतुं
शक्यत्वादिति चेन्न पूर्वस्य विधिः पूर्वस्माद्विधिरिति समासद्वयलाभार्थं विधिग्रहणात् यथपत्र पंचमी समासपक्षोमूलेनोक्त
वि

ता

अ

25

त० ९२

यापि पूर्वस्मादपि विधौ स्यानिवद्भावइति परेतु अङ्ग्रहणाय इत्येवानलोन्त्व मिति पदन्तादिप्रकरणोऽस्वीकृत एव समासः अल्विध

र्थमिति तेनकञ्चेत्यत्र वस्य संप्रसारणं न उरदत्वस्य स्थानिवत्वेन संप्रसारणेन तथा न संप्रसारणे इति निषेधात् यचोरदत्वं पानिमित्त

मिति वाच्यं अणाश्रित्तिप्रयोगेत द्विधानात पूर्वस्माद्विधिः पूर्वविधिरिति पंचमीसमासपक्षस्य तु प्रयोजनं तन्वंतितन्वतेरूप एणादे

शस्य स्थानिवद्भावान्नेट् अत्र हि न निषेधानिमित्तं तस्य निमूलात् उकारात्पूर्वमिति न त्विदं न प्रयोजनं बहिरंगस्यासिद्धत्वा

दिडागमस्याप्रसक्तेः नच नाजानंतर्य इति निषेधः अत्रांतरंगे बहिरंगे वा चोरानंतर्यमिति हरदत्तादिमते निषेधप्रवृत्तावपि

उत्तरकार्ये वाच अनंतर्यमाश्रित्यं वहि अलूनेति केपटमते तदभावात् नन्वेवमपि अपायपन् इति प्रयोजनं भवत्येव इ

ह हि अंतरेको स्यच्च ङकारस्य च अतोलोप इति परेऽपत्वे पाणेः द्वद्भावात् किंग्रहणेन ग्रहणे सति सिज्भवतीति मुख्याभावाति ति

लोपस्य एकादेशस्य वा स्थानिवद्भावान्नभवतीति वाच्यम् वेतेर्हि लिङ्गवानं तो दिः संभवतीति तस्मात्साहचर्यादसत्वाद वि

लङ् एव कृत्र्प्रविधानात् नवतिचासह चाप्यति लङ् एव ग्रहणे मा त्विति सूर्यं विप्रतिषेधे परामिति साहचर्यस्य बलीयस्त्वा

त् नचैवमप्यदन्तादित्यदादेशस्य निवारणाय पंचमीसमासपक्ष आश्रयणक इति वाच्यं चङ्कारस्य प्रतेकोस्य चातो गुण

इति पररूपे कृते तस्याभावादवादेशाप्रसक्तेः अनत्वेकादेशस्य परादिवद्भावात् ग्रहणेन ग्रहणे न भवति आत्वि यौ अनादि

वद्भावा प्रवृत्तेः अन्यथा अपजेद् इमित्यादौ सवर्णदीर्घे एवं द्वौरः स्यात् अन्तुवापणादिवद्भाव तथा पिकारकोसोऽदित्यस

देशो कर्तव्ये उंताद्देशोनस्यानिवृदात्विधित्वात् तस्मात्पंचमी समासपक्षो निरर्थक एवेति चेत् अत्राहुः पंचमीसमासप्रयोजनन तया

अवीपा चत्वि सुदाहृतो मगाव नत्वेह साहचर्यं निमासकलया संमतम् हूक्तिचतुरितिमूत्रे कस्योर्थ्यग्रहणेनजापकान्साह

राम

९२

चर्य्येन सर्वत्राश्रीयते एवंच भवतेर्यङ्लुकि अप्यसाम्ब्रजुसः प्रवृत्या अबोभूवुरिति सिद्धं सिध्यति आतइति नियमस्य सिचः प
रत्वे मा भित्वयोनुस्मात्तस्मान्मात्रपरतेर्या मा धवाद्विभि र्व्याख्यातत्वात् अतएवाभ्यस्ताश्रयोजुस् नित्यत्वाद्वुक् अबोभूवुरि
ति मूलेयदुःलुगंते उक्तम् तथाचापी पचरत्ये तानि द्वये पंचमी समासपक्षः अयल्लोपं इति अन्येत्वाहुः पंचमीसमास
पक्षप्रयोजनं तथा भाष्ये वेभिदितामातिचिकरत्यस्याष्युदाहृतत्वात् नतत्र्यैवेयर्थ्यशंकाकार्य्या यद्यपि प्रत्ययः कालो
पस्यस्था निवद्भावं विनापि एकाच्उपदेशे नुदात्तादित्यत्र विहितविशेषणाश्रयणादेवइटनिषेधास्पप्रवृत्तो भिदे र्यङ्लुतात्ततत्त्वे
वेभिदितेति सुसाधम् तथापि माधिति करत्यत्रापि तरस्य परोस्मिति चकि इकादेशे चकृते यस्येति चेति यकारलोपादिषुकृतो
त्वादिति रकस्थाने प्रसज्यमानो य एकादेशः सोप्यल्लोपस्य स्थानिवद्भावं विनेव सुपरिहरः तस्येकरत्यत्र स्थान्यादेशयो
रकारउच्चारणार्थं इत्याभ्युपगमेऽल्विधित्वेन स्थानिवद्भावाप्रवृत्ता तस्यानिक इकादेशाश्रोनमवतीति कादेशणस्य सत्त्वे मोधि
तिकरति ऌपतिसिद्धौ पंचमीसमासपक्षाश्रयणेनेति वाच्यम् मधितयतेः क्विपि टिलोपल्लोपयो र्वरश्च कृतेलोपेच मधि
त जेन चरतिमाध्यैतिकरत्यत्र चलोति चकि तस्येकादेशासिद्धये तत्प्रत्ययस्यावश्यकत्वात् नचात्रस्थानिवद्भावं वि
नाइकादेशः कादेशः सपरिहरति नाप्येतादृशाकल्पनायांमानाभावः शंक्योमाधितिकरति भाष्योदाहरणस्यैवमानत्वा
त्इति स्यादेतत् पूर्वत्वस्यसावधित्वेन संनिहितस्यैवावधित्वमुचितं संनिहितं चेहनपंस्थानीआदेशोनिमित्तं च तत्र
तावत्स्थानीनावधिः तस्यादेशेनापहोहात् नाप्यादेशनिमित्ते चेष्या कृतस्य त्यत्र एकारस्यामादेशापत्तेरित्याशंक्याह अ

५७

27

ते॰ ९८

चापूर्वत्वेन दृष्टस्येति पूर्वत्वमुपलक्षणं न तु विशेषणमिति भावः नापदांत पदांतादीनां चतुर्णां द्वंद्वः ततो विधिशब्देन क

र्मषष्ठ्यंतस्य समासः विधिशब्दस्य भावसाधने विधानम् विधिरिति द्वंद्वांतेश्रूयमाणत्वात् प्रत्येकं संबध्यते पदस्यचरमो

वयवइति वर्त्तते नीति वृत्तौ वर्त्तंवातीति वर्त्तता न माचक्षे वर्त्तयति ततो विच् वृत्तव् रहलोपोव्योरिति वलोपो न ह्रिलो

पस्यलित्वे यस्यवास्थानिवत्वात् नचपूर्वत्रासिद्धमिति हरदत्तादिमते अंतवर्तिसुपापवादत्वाच्चपदांते इति निषेधःशंक्यः वि

धेयस्यलोपस्यपदानवयवत्वात् पदांतस्यस्थाने विधौ नेतिव्याख्याने तु पदांतेति स्थानिवत्वनिषेधात् लोपःस्यादेवत्यादि

मनोरमायांस्थितं द्विर्वचनादौ चेति यलोपादयः आदिशब्दार्थाः वरेइतितु वोयोःआदेशः सस्थानिवदितिव्याख्येयम सहविव

त्ताभावेपि निपातनाद्वंद्वः सस्यलुक् अयोदाहरणानि पदांते कानिसंतिकोसः रहयणादेशयोः कर्त्तव्ययोः प्रनसोर

ल्लोपोनस्थानिवत् नचैकारौकारयोः स्थानिभूतादचः पूर्वत्वविरहादेवाल्लोपोनस्थानिवदिति वाच्यम् वाकयादयो द्वन्द्व

पदानि संक्षिपत इति पक्षेस्थानिभूतादचः पूर्वत्वस्यसत्वात् यद्यागोचःगोचेत्यादावोकारस्यावदि॰ कर्तव्ये अचइत्यल्लो

पोनस्थानिवदित्युदाहार्यं अत्रहिलोपस्थान्यकारात्पूर्वत्वेन दृष्टत्वोकारस्यापिद्विर्वचने सुद्धुपास्यः नजानंतर्यइति निषेधा

द्दूरिंगपरीभावात्र न प्रवर्तते स्थानिवद्भावनिषेधसामर्थ्याद् एवं कश्चिदन्यान्याप्युदाहरणम् वरेयायावरः यातेर्यङं तातघ

अ यङ् इति वचे अतोलोपः सच आतोलोपइति चेत्यालोपे कर्तव्ये न स्थानिवत् यलोपे यातिः यातेर्यङं तात् क्रिच अ

तोलोपःयलोपः अल्लोपस्यास्थानिवत्वादातोलोपः यलोपः नचपुनरालोपःशंक्यः चिणोलुङन्यायेनालोपस्यानित्य

त्वात् स्थानिवद्भावात्र नतु परि यलोपविधिं प्रति स्थानिवत्वनिषेधस्तर्हि कथं वाप्नोतीति उच्यते अस्तिद्वंद्वहिंसामिति यत्स्ता

दो

राम ९८

२८

त
२५

स्यात्

याद्दीर्घान्तरस्य तत्रनिपातितदीर्घादिभ्यः इति वा । नैकेनसनो विकल्पितेत्त्वात् तस्मात्कालावधारणार्थः सेट्ग्रहणमिति इति कि
न्ते णिलोपोन तु तनः प्रथि ति अन्यथा कारितमित्यादौ णिलोपे कृते एकाच उपदेशे इतीड् निषेधः स्यादिति यद्यपि पूर्वस्माद्विधौ स्था
निवत्त्वं तर्हि णिचा व्यवधानात् निषेधप्राप्तिरेव नास्तीति सेटीत्यनर्थकं सन्नस्थानित्वं मान्तापयतीति ध्येयं ननु अजस्थल विधौ य
दिस्थानिवद्भावनिषेधस्तर्हि पिपचतीत्यत्रान्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वान्न्यज्झल्त्वमेवे इत्युवदित्यतिदिष्टया भसंज्ञया पद
संज्ञाया बाधान्नशत्वाप्रवृत्तेः । चाजिरन्त्येषु तः घसेर्लिटि अगृह्य उससच्च गमहनेत्युपधालोपः खरि चेति चर्त्वं प्रति न स्था
निवत् भाष्ये तु पूर्वत्रासिद्धेन स्थानिवदित्येव सूत्रे द्विर्वचनसवर्णानुस्वारदीर्घजश्चरः प्रत्याख्याताः तद्व्यायते सलोपे (
पत्वे च वर्तव्ये स्थानिव द्भंके व नास्तीति बोध्यम् अदर्शनं लोपः अत्र दर्शितं ज्ञानसामान्यवचनं । दर्शनं ज्ञानं तदिह
